# महालक्ष्मी स्तुतिः

आदिलक्ष्मि नमस्तेऽस्तु परब्रह्म स्वरूपिणि ।
यशो देहि धनं देहि सर्वकामांश्च देहि मे ॥ १॥

सन्तानलक्ष्मि नमस्तेऽस्तु पुत्रपौत्र प्रदायिनि ।
पुत्रान् देहि धनं देहि सर्वकामांश्च देहि मे ॥ २॥

विद्यालक्ष्मि नमस्तेऽस्तु ब्रह्मविद्या स्वरूपिणि ।
विद्यां देहि कलां देहि सर्वकामांश्च देहि मे ॥ ३॥

धनलक्ष्मि नमस्तेऽस्तु सर्व दारिद्य नाशिनि ।
धनं देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ ४॥

धान्यलक्ष्मि नमस्तेऽस्तु सर्वाभरण भूषिते ।
धान्यं देहि धनं देहि सर्वकामांश्च देहि मे ॥ ५॥

मेधालक्ष्मि नमस्तेऽस्तु कलि कल्मष नाशिनि ।
प्रज्ञां देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ ६॥

गजलक्ष्मि नमस्तेऽस्तु सर्वदेव स्वरूपिणि ।
अश्वांश्च गोकुलं देहि सर्वकामांश्च देहि मे ॥ ७॥

वीरलक्ष्मि नमस्तेऽस्तु पराशक्ति स्वरूपिणि ।
वीर्यं देहि बलं देहि सर्वकामांश्च देहि मे ॥ ८॥

जयलक्ष्मि नमस्तेऽस्तु सर्वकार्य जयप्रदे ।
जयं देहि शुभं देहि सर्वकामांश्च देहि मे ॥ ९॥

भाग्यलक्ष्मि नमस्तेऽस्तु सौमंगल्य विवर्धिनि ।
भाग्यं देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ १०॥

कीर्तिलक्ष्मि नमस्तेऽस्तु विष्णु वक्षस्थल स्थिते ।
कीर्तिं देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ ११॥

आरोग्यलक्ष्मि नमस्तेऽस्तु सर्वरोग निवारणि ।
आयुर्देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ १२॥

सिद्धलक्ष्मि नमस्तेऽस्तु सर्वसिद्धि प्रदायिनि ।
सिद्धिं देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ १३॥

सौन्दर्यलक्ष्मि नमस्तेऽस्तु सर्वालंकार शोभिते ।
रूपं देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ १४॥

साम्राज्यलक्ष्मि नमस्तेऽस्तु भुक्ति मुक्ति प्रदायिनि ।
मोक्षं देहि श्रियं देहि सर्वकामांश्च देहि मे ॥ १५॥

मंगले मंगलाधारे मांगल्ये मंगलप्रदे ।
मंगलार्थं मंगलेशि मांगल्यं देहि मे सदा ॥ १६॥

सर्वमंगल मांगल्ये शिवे सर्वार्थ साधिके ।

शरण्ये त्रयम्बके देवि नारायणि नमोऽस्तु ते ॥ १७॥

शुभं भवतु कल्याणी आयुरारोग्य सम्पदाम् ।
मम शत्रु विनाशाय दीपज्योति नमोऽस्तु ते ॥ १८॥

दीपज्योति नमस्तेऽस्तु दीपज्योति नमोऽस्तु ते ।